# OM namo nArAyaNAya aShTAkSharamAhAtmyaM

# ૐ નમો નારાયણાય અષ્ટાક્ષરમાહાત્મ્યમ્

## Document Information

Text title : OMnamonArAyaNAya aShTAksharamantramAhAtmya

File name : OMnamonArAyaNAyaaShTAksharamantramAhAtmya.itx

Category : vishhnu, narayana, stotra, vishnu, mAhAtmya, mantra

Location : doc_vishhnu

Proofread by : Singanallur Ganesan singanallur at gmail.com

Translated by : https://archive.org/details/NarsimhaPuranGitapress

Description-comments : Narasimhapurana adhyAya 17

Latest update : June 6, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

OM namo nArAyaNAya aShTAkSharamAhAtmyaM

# ૐ નમો નારાયણાય અષ્ટાક્ષરમાહાત્મ્યમ્

શ્રીશુક ઉવાચ –
કિં જપન્ મુચ્યતે તાત સતતં વિષ્ણુતત્પરઃ ।
સંસારદુઃખાત્ સર્વેષાં હિતાય વદ મે પિતઃ ॥ ૧॥

વ્યાસ ઉવાચ –
અષ્ટાક્ષરં પ્રવક્ષ્યામિ મન્ત્રાણાં મન્ત્રમુત્તમમ્ ।
યં જપન્ મુચ્યતે મર્ત્યો જન્મસંસારબન્ધનાત્ ॥ ૨॥

હૃત્પુણ્ડરીકમધ્યસ્થં શઙ્ખચક્રગદાધરમ્ ।
એકાગ્રમનસા ધ્યાત્વા વિષ્ણું કુર્યાજ્જપં દ્વિજઃ ॥ ૩॥

એકાન્તે નિર્જનસ્થાને વિષ્ણવગ્રે વા જલાન્તિકે ।
જપેદષ્ટાક્ષરં મન્ત્રં ચિત્તે વિષ્ણું નિધાય વૈ ॥ ૪॥

અષ્ટાક્ષરસ્ય મન્ત્રસ્ય ઋષિર્નારાયણઃ સ્વયમ્ ।
છન્દશ્ચ દૈવી ગાયત્રી પરમાત્મા ચ દેવતા ॥ ૫॥

શુક્લવર્ણં ચ ૐકારં નકારં રક્તમુચ્યતે ।
મોકારં વર્ણતઃ કૃષ્ણં નાકારં રક્તમુચ્યતે ॥ ૬॥

રાકારં કુઙ્કુમાભં તુ યકારં પીતમુચ્યતે ।
ણાકારમઞ્જનાભં તુ યકારં બહુવર્ણકમ્ ॥ ૭॥

ૐ નમો નારાયણાયેતિ મન્ત્રઃ સર્વાર્થસાધકઃ ।
ભક્તાનાં જપતાં તાત સ્વર્ગમોક્ષફલપ્રદઃ ।
વેદાનાં પ્રણવેનૈષ સિદ્ધો મન્ત્રઃ સનાતનઃ ॥ ૮॥

સર્વપાપહરઃ શ્રીમાન્ સર્વમન્ત્રેષુ ચોત્તમઃ ।
એનમષ્ટાક્ષરં મન્ત્રં જપન્નારાયણં સ્મરેત્ ॥ ૯॥

સંધ્યાવસાને સતતં સર્વપાપૈઃ પ્રમુચ્યતે ।

એષ એવ પરો મન્ત્ર એષ એવ પરં તપઃ ॥ ૧૦॥

એષ એવ પરો મોક્ષ એષ સ્વર્ગ ઉદાહૃતઃ ।
સર્વવેદરહસ્યેભ્યઃ સાર એષ સમુદ્ધૃતઃ ॥ ૧૧॥

વિષ્ણુના વૈષ્ણવાનાં હિ હિતાય મનુજાં પુરા ।
એવં જ્ઞાત્વા તતો વિપ્રો હ્યષ્ટાક્ષરમિમં સ્મરેત્ ॥ ૧૨॥

સ્નાત્વા શુચિઃ શુચૌ દેશે જપેત્ પાપવિશુદ્ધયે ।
જપે દાને ચ હોમે ચ ગમને ધ્યાનપર્વસુ ॥ ૧૩॥

જપેન્નારાયણં મન્ત્રં કર્મપૂર્વે પરે તથા ।
જપેત્સહસ્રં નિયુતં શુચિર્ભૂત્વા સમાહિતઃ ॥ ૧૪॥

માસિ માસિ તુ દ્વાદશ્યાં વિષ્ણુભક્તો દ્વિજોત્તમઃ ।
સ્નાત્વા શુચિર્જપેદ્યસ્તુ નમો નારાયણં શતમ્ ॥ ૧૫॥

સ ગચ્છેત્ પરમં દેવં નારાયણમનામયમ્ ।
ગન્ધપુષ્પાદિભિર્વિષ્ણુમનેનારાધ્ય યો જપેત્ ॥ ૧૬॥

મહાપાતકયુક્તોઽપિ મુચ્યતે નાત્ર સંશયઃ ।
હૃદિ કૃત્વા હરિં દેવં મન્ત્રમેનં તુ યો જપેત્ ॥ ૧૭॥

સર્વપાપવિશુદ્ધાત્મા સ ગચ્છેત્ પરમાં ગતિમ્ ।
પ્રથમેન તુ લક્ષેણ આત્મશુદ્ધિર્ભવિષ્યતિ ॥ ૧૮॥

દ્વિતીયેન તુ લક્ષેણ મનુસિદ્ધિમવાપ્નુયાત્ ।
તૃતીયેન તુ લક્ષેણ સ્વર્ગલોકમવાપ્નુયાત્ ॥ ૧૯॥

ચતુર્થેન તુ લક્ષેણ હરેઃ સામીપ્યમાપ્નુયાત્ ।
પઞ્ચમેન તુ લક્ષેણ નિર્મલં જ્ઞાનમાપ્નુયાત્ ॥ ૨૦॥

તથા ષષ્ઠેન લક્ષેણ ભવેદ્વિષ્ણૌ સ્થિરા મતિઃ ।
સપ્તમેન તુ લક્ષેણ સ્વરૂપં પ્રતિપદ્યતે ॥ ૨૧॥

અષ્ટમેન તુ લક્ષેણ નિર્વાણમધિગચ્છતિ ।
સ્વસ્વધર્મસમાયુક્તો જપં કુર્યાદ્ દ્વિજોત્તમઃ ॥ ૨૨॥

એતત્ સિદ્ધિકરં મન્ત્રમષ્ટાક્ષરમતન્દ્રિતઃ ।
દુઃસ્વપ્નાસુરપૈશાચા ઉરગા બ્રહ્મરાક્ષસાઃ ॥ ૨૩॥

જાપિનં નોપસર્પન્તિ ચૌરક્ષુદ્રાધયસ્તથા ।
એકાગ્રમનસાવ્યગ્રો વિષ્ણુભક્તો દૃઢવ્રતઃ ॥ ૨૪॥

જપેન્નારાયણં મન્ત્રમેતન્મૃત્યુભયાપહમ્ ।
મન્ત્રાણાં પરમો મન્ત્રો દેવતાનાં ચ દૈવતમ્ ॥ ૨૫॥

ગુહ્યાનાં પરમં ગુહ્યમોંકારાદ્યક્ષરાષ્ટકમ્ ।
આયુષ્યં ધનપુત્રાંશ્ચ પશૂન્ વિદ્યાં મહદ્યશઃ ॥ ૨૬॥

ધર્માર્થકામમોક્ષાંશ્ચ લભતે ચ જપન્નરઃ ।
એતત્ સત્યં ચ ધર્મ્યં ચ વેદશ્રુતિનિદર્શનાત્ ॥ ૨૭॥

એતત્ સિદ્ધિકરં નૃણાં મન્ત્રરૂપં ન સંશયઃ ।
ઋષયઃ પિતરો દેવાઃ સિદ્ધાસ્ત્વસુરરાક્ષસાઃ ॥ ૨૮॥

એતદેવ પરં જપ્ત્વા પરાં સિદ્ધિમિતો ગતાઃ ।
જ્ઞાત્વા યસ્ત્વાત્મનઃ કાલં શાસ્ત્રાન્તરવિધાનતઃ ।
અન્તકાલે જપન્નેતિ તદ્વિષ્ણોઃ પરમં પદમ્ ॥ ૨૯॥

નારાયણાય નમ ઇત્યયમેવ સત્યં
સંસારઘોરવિષસંહરણાય મન્ત્રઃ ।
શ‍ૃણ્વન્તુ ભવ્યમતયો મુદિતાસ્ત્વરાગા
ઉચ્ચૈસ્તરામુપદિશામ્યહમૂર્ધ્વબાહુઃ ॥ ૩૦॥

ભૂત્વોર્ધ્વબાહુરદ્યાહં સત્યપૂર્વં બ્રવીમ્યહમ્ ।
હે પુત્ર શિષ્યાઃ શ‍ૃણુત ન મન્ત્રોઽષ્ટાક્ષરાત્પરઃ ॥ ૩૧॥

સત્યં સત્યં પુનઃ સત્યમુત્ક્ષિપ્ય ભુજમુચ્યતે ।
વેદાચ્છાસ્ત્રં પરં નાસ્તિ ન દેવઃ કેશવાત્ પરઃ ॥ ૩૨॥

આલોચ્ય સર્વશાસ્ત્રાણિ વિચાર્ય ચ પુનઃ પુનઃ ।
ઇદમેકં સુનિષ્પન્નં ધ્યેયો નારાયણઃ સદા ॥ ૩૩॥

ઇત્યેતત્ સકલં પ્રોક્તં શિષ્યાણાં તવ પુણ્યદમ્ ।
કથાશ્ચ વિવિધાઃ પ્રોક્તા મયા ભજ જનાર્દનમ્ ॥ ૩૪॥

અષ્ટાક્ષરમિમં મન્ત્રં સર્વદુઃખવિનાશનમ્ ।
જપ પુત્ર મહાબુદ્ધે યદિ સિદ્ધિમભીપ્સસિ ॥ ૩૫॥

ઇદં સ્તવં વ્યાસમુખાત્તુ નિસ્સૃતં

સંધ્યાત્રયે યે પુરુષાઃ પઠન્તિ ।
તે ધૌતપાણ્ડુરપટા ઇવ રાજહંસાઃ
સંસારસાગરમપેતભયાસ્તરન્તિ ॥ ૩૬॥

ઇતિ શ્રીનરસિંહપુરાણે અષ્ટાક્ષરમાહાત્મ્યં નામ સપ્તદશોઽધ્યાયઃ ॥ ૧૭॥

Narasimhapurana adhyAya 17

https://archive.org/details/NarsimhaPuranGitapress

Proofread by Singanallur Ganesan singanallur at gmail.com

*OM namo nArAyaNAya aShTAkSharamAhAtmyaM*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*